# संस्कृत-वार्ता:

**दिनाङ्क :- 07.06.2024** **सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- प्रधानमन्त्री रविवासरे तृतीयवारं भारतस्य प्रधानमन्त्रिरूपेण शपथवनचनं स्वीकरिष्यति।
- भारतीयऋतुविज्ञानविभागेन आगामि चतुर्षुदिवसेषु पूर्व-भारते , उत्तरप्रदेशे, मध्यप्रदेशस्य केषुचित् क्षेत्रेषु उष्मतरङ्गप्रवाहः सम्भावितः।
- अमन-सहरावतेन हंगरीदेशे बुडापेस्ट-रैंकिंग-सीरीज़ इत्यस्यां स्पर्धायां रजतपदकं विजितम्।

-------------------

**राष्ट्रीय-जनतांत्रिक-ग्रन्थिबंधन-सर्वकारसंरचना**

राष्ट्रीय-जनतांत्रिक-ग्रन्थिबंधनं (एनडीए) इत्यस्य संसदीय-दलस्य उपवेशने अद्य नरेंद्र-मोदि-वर्यः संसदीय-दलस्य नेता विचितः। भारतीय-जनता-पार्टीति दलस्य वरिष्ठ-नेता, केंद्रीय-मंत्री च राजनाथ-सिंहः अद्य एनडीए-संसदीय-दलस्य नेतृरूपेण नरेंद्र-मोदिनः नाम्नः प्रस्तावम् उपस्थापयत् । राजनाथसिंहस्य प्रस्तावस्य केंद्रीय-मंत्री अमित-शाहः, नितिन-गडकरी, टीडीपी-प्रमुखः चंद्रबाबूनायडू, जेडीयू-अध्यक्षः बिहारस्य मुख्यमंत्री च नीतीश-कुमारः, एनडीए-ग्रन्थिबन्धनस्य सर्वाणि घटकदलानि च समर्थनं कृतवन्तः । श्रीमोदिनः नाम्नः प्रस्तावं उपस्थापयन् राजनाथ-सिंहः प्रोक्तवान् यत् सः अस्मै पदाय सर्वथोपयुक्तः अस्ति। सः अकथयत् यत्-इदं ग्रन्थिबन्धनम् अस्माकं प्रतिबद्धतायाः परिणामः अस्ति। प्रस्तावं समर्थयन् केंद्रीय-मंत्री अमित-शाहः प्रोक्तवान् यत् एषा न केवलं एनडीए-संसदीय-दलोपवेशने उपस्थितानां नेतृणाम् अपितु अस्य देशस्य चत्वारिंशदधिकैककोटि-जनानान् समीहा वर्तते। भाजपादलस्य वरिष्ठ-नेता केंद्रीय-मंत्री नितिनगडकरी प्रोक्तवान् यत् प्रधानमंत्री-मोदी इदं सुनिश्चेतुं पूर्णसमर्पणभावेन सह कार्यम् अकरोत् यत् देशः समृद्धः शक्तिसम्पन्नश्च भवेत्। प्रधानमंत्री नरेंद्रमोदी, केंद्रीयमंत्री पीयूषगोयलः, अनुराग-सिंह-ठाकुरः, एलजेपी (आर) प्रमुखः चिराग-पासवानः, एनसीपी-नेता अजित-पवारः, आरएलडी-प्रमुखः जयंत-चौधरी, जन-सेना-प्रमुखः पवन-कल्याणः, अपना-दलस्य (एस) नेत्री अनुप्रियापटेल, जद (एस) नेता एचडीकुमारस्वामी , अन्ये नेतारः च अस्मिन् उपवेशने उपस्थिता आसन्।

**शपथग्रहणसमारोहः**

भाजपादस्य वरिष्ठ-नेता श्रीनेरेंद्रमोदिवर्यः रविवासरे तृतीयवारं प्रधानमन्त्रि-पदस्य शपथवचनं स्वीकरिष्यन्ति । शपथ-ग्रहण-समारोहः सायं षड्वादने राष्ट्रपति-भवने भविष्यति। केन्द्रीयमन्त्री प्रह्लादजोशी अद्य नवदिल्ल्याम् एनडीए-संसदीय-दलस्य उपवेशनावधौ इदं संसूचितवान्। राष्ट्रपति-द्रौपदीमुर्मूवर्यया नरेन्द्रमोदिने तस्य नवनर्वाचित-सर्वकराय च शपथवचनं ग्राहयिष्यते।

**प्रधानमन्त्री-यूक्रेन-राष्ट्रपतिः**

यूक्रेनस्य राष्ट्रपतिः व्लादिमिर-ज़ेलेंस्की प्रधानमन्त्रिणे नरेंद्रमोदिने यूक्रेनयात्रायाः निमन्त्रणं अयच्छत्। एतत् निमन्त्रणं द्वयोर्मध्ये दूरभाषमाध्यमेन जाते परस्परसम्वाद-समये समागतम् सहैव ज़ेलेंस्की-वर्यः प्रधानमंत्रिणे तस्य निर्वाचन-विजयम्, सर्वकार-निर्माणम् च अधिकृत्य वर्धापनानि अयच्छत्। भारतीयजनानां लाभाय निरन्तर-सहयोगस्य इच्छां व्यक्तीकुर्वन्, राष्ट्रपतिः ज़ेलेंस्की आगामि वैश्विक-शांति-शिखर-सम्मेलने भारतस्य सहभागित्वं महत्वपूर्णम् इति प्रत्यपादयत्।

## राज्यसभा-अधिसूचना

केरले राज्यसभायाः त्रिभ्यः निर्वाचनासनेभ्यः निर्वाचनस्य अधिसूचना प्रकाशिता अभवत् । सीपीआई-दलस्य नेता बिनॉय-बिस्वामः, सीपीआई (एम)-दलस्य नेता एलामाराम-करीमः, केसी (एम)-दलस्य नेता जोस-के-मणिः इत्येतेषां कार्यकालं जुलाईमासस्य एकदिनाङ्के समाप्स्यते। राज्यसभायाः महाराष्ट्रतः एकस्मै निर्वाचनासनाय अपि ह्यः उपनिर्वाचनस्य अधिसूचना प्रकाशिता जाता। ध्यानास्पदं वर्तते यत् एतत् निर्वाचनासनं एनसीपी-दलस्य नेता प्रफुल्ल-पटेलः इत्यस्य त्यागपत्रानन्तरं रिक्तं सञ्जातम् अस्ति। केरल-महाराष्ट्रयोः निर्वाचनासनाभ्यां अस्य मासस्य त्रयोदशदिनाङ्के नामाङ्कनं विधातुं शक्यते, मतदानं च पञ्चविंशति-दिनाङ्के भविष्यति।

## फ्रेंच ओपन-सेमीफाइनल:

फ्रेंच-ओपन-टेनिस्-स्पर्धायां पुरुषैकलवर्गस्य उपान्त्यचक्रे क्रीडास्पर्धाः अद्य सायं फ्रांसस्य पेरिसनगरे क्रीडिष्यन्ते। प्रथमोपान्त्यचक्रे तृतीय-वरीयता-प्राप्तस्य स्पेनदलस्य कार्लोस्-अलकराज-गारफिया द्वितीय-वरीयता-प्राप्तं इटलीदलस्य जैनिक-सिनरः इत्येतं सम्मुखीकरिष्यति। अपरत्र द्वितीये उपान्त्यचक्रे सप्तम-वरीयता-प्राप्तस्य नॉर्वे-दलस्य कैस्पर-रूडः चतुर्थ-वरीयता-प्राप्तं जर्मनीदलस्य अलेक्जेंडर-ज्वेरेव इत्येतं सम्मुखीकरिष्यति। अस्मिनेवावधौ, भारतस्य रोहन-बोपन्ना ऑस्ट्रेलियायाः मैथ्यू-एब्डेनः इत्यनयोः द्वितीय-वरीयता-प्राप्त-युगलं स्पर्धायाः बहिरभवत्।

## सिक्किम क्रांतिकारी मोर्चा

सिक्किम-क्रांतिकारी-मोर्चा इत्यस्य संसदीय-दलेन सर्वसम्मत्या भारतस्य प्रधानमंत्रित्वेन नरेन्द्र-मोदिनः समर्थनस्य निर्णयः स्वीकृतः अस्ति। मुख्यमन्त्रिणा प्रेम-सिंह-तमांगेन स्वकीये आधिकारिके सार्वजनिक-संदेश-पटले इयं घोषणा कृता। तेन प्रोक्तं यत् - "अद्य मदीये आधिकारिकावासे, मिंटोकगांग-क्षेत्रे नवनिर्वाचितैः विधायकैः सह जाते उपवेशने, वयं सर्वसम्मत्या भारतस्य प्रधानमन्त्रित्वेन नरेंद्र-मोदिने समर्थनं प्रदातुं निर्णयं स्वीकृतवन्तः।" सः प्रोक्तवान् यत्- तेन जूनमासस्य दशमदिनाङ्के पलजोर इत्यत्र स्वकीयः शपथ-ग्रहण-समारोहः अपि निर्धारितः अस्ति।

## मुंबई-आरबीआई-द्वि-मासिकनीति:

रिजर्वबैंकेन द्विमासिक-मौद्रिक-नीत्याः समीक्षायां रेपो इति क्रयानुबन्धं यथापूर्वं षट्-दशमलवं-पञ्च-प्रतिशतम् एवं विधातुं निर्णयः स्वीकृतः अस्ति। शीर्ष-बैंकेन निरन्तरं अष्टमवारं क्रयानुबन्धमितिम् अधिकृत्य किमपि परिवर्तनं न कृतम् अस्ति। स्टैंडिंग-डिपॉजिट-फैसिलिटी (एसडीएफ) इत्यस्य मितिः षट्-दशमलव-पञ्चविंशति-प्रतिशन्मितं, अपरत्र मार्जिनल-स्टैंडिंग-फैसिलिटी (एमएसएफ) बैंकं च इत्यनयोः मितिः षट्-दशमलव-पञ्चसप्तति-प्रतिशन्मितं यथापूर्वम् एव विधातुं निर्णयः स्वीकृतः। शीर्ष-बैंकस्य मौद्रिक-नीति-समित्याः त्रिदिवसीयोपवेशनं जूनमासस्य पञ्चदिनाङ्के अभवत्। उपवेशनानन्तरं निर्णयसम्बद्धाः घोषणाः कुर्वन् आरबीआई-प्रमुखः शक्तिकांत-दासः प्रोक्तवानम् यत् मुद्रास्फीतिः आर्थिकवृद्धिः इत्यनयोः परस्पर-संतुलनं अनुकूलम् आसीत्। सः अकथयत् यत् मौद्रिक-नीत्याः प्रतिबद्धता मुद्रास्फीतिं चत्वारि-प्रतिशन्मितं यावत् कर्तुम् अस्ति। श्रीदासः पुनः प्रोक्तवान् यत् मौद्रिक-नीति-समितिः सामान्य-वर्षाकालीनसत्रस्य खाद्य-मुद्रास्फीतिमितस्य अनुमानम् अपि समीक्ष्यति। रिजर्व-बैंकेन वर्तमान-वित्तीय-सत्राय आर्थिक-वृद्धिमितस्य अनुमानं सप्त-प्रतिशन्मिततो सम्वर्ध्य सप्त-दशमलव-द्विप्रतिशन्मितं कृतम् अस्ति।

## जेडीयू-उपवेशनम्

जनता-दलस्य अध्यक्षः अथ बिहारस्य मुख्यमन्त्री नितीश-कुमारः अध्य नवदिल्ल्याः स्व-आवासे संसदीय-दलस्योपवेशनं विहितवान्। उपवेशने अस्मिन् जेडीयू इति दलस्य लल्लनसिंहः सञ्जयकुमारझा , अजयकुमारमण्डलः, विजयलक्ष्मीकुशवाहा, कुशलेन्द्रकुमारः, रामनाथठाकुरः, देवेशचन्द्रठाकुरः, सुनिलकुमारः,लवलीआनन्दः, गिरिधारीयादवः, अनिलहेगड़े च सहभागं कृतवन्तः। अस्मिन्नेव क्रमे

लोकजनशक्ति-दलेन अपि नवदिल्ल्यां संसदीय-दलोपवेशनं कृतम्। अत्रावधौ राष्ट्रीयाध्यक्षः चिरागपासवानः दलस्यास्य संसदीयसमितेः अध्यक्षत्वेन चितः।

**पश्चिमबङ्गालः-निर्वाचनहिंसा**

निर्वाचनानन्तरं पश्चिम-बङ्गालस्य विभिन्नेभ्यः क्षेत्रेभ्यः हिंसायाः प्रकरणम् आयाति। उत्तरबङ्गालस्य कूचबिहार-जनपदस्य अण्डारन-फुलबरी-ग्राम-पञ्चायतस्य अष्टाशीत्युत्तर-एकशततमे मतदानकेन्द्रे जनाः टीएमसी इति दलस्य समर्थकान् विरुध्य प्रतिवेदनं कृतवन्तः यत् तैः पेयजलनलिकाः खण्डिताः। यद्यपि भाजपेति दलेन आरोपितं यत् तृणमूम-कॉङ्ग्रेस-दलेन इयं घटना आचरिता किन्तु तृणमूल कॉङ्ग्रेसदलेन आरोपोऽयं निरस्तीकृतः।

**भारतीयऋतुविज्ञानविभागः**

भारतीयऋतुविज्ञानविभागेन आगामि-दिवसेषु पूर्व-भारते , उत्तरप्रदेशे, मध्यप्रदेशस्य केषुचित् क्षेत्रेषु उष्मतरङ्गप्रवाहः सम्भावितः।विभागेन झारखण्ड, बिहार, उड़ीसा,पञ्जाब-हरियाणा राज्येषु अपि उष्मतरङ्गप्रवाहः सम्भावितः। अवधेयं यत् अग्रिमेषु पञ्चदिवसेषु महाराष्ट्रे, उत्तर-कर्णाटके च भारतीयऋतुविज्ञानविभागेन अतिवृष्टेः सम्भावना प्रकटिता।

**मल्लक्रीडा-बुडापेस्ट**

मल्लक्रीडायां भारतस्य अमन-सहरावतेन ह्यः सायं हंगरीदेशे बुडापेस्ट-रैंकिंग-सीरीज़ इत्यस्यां स्पर्धायां रजतपदकं विजितम्। पुरुषाणां मुक्तक्रीडायाः सप्तपञ्चाशत् -किलोग्राम-भारवर्गे अमनः स्वकीयं अंतिमक्रीडाद्वन्द्वं रजत-पदक विजेतृणा जापानस्य री-हिगुची इत्यनेन एकं विरुध्य एकादश-क्रीडनाङ्कैः पराजितः।

------------